# shrIpadmAvatIpariNayatArAvaliH

# શ્રીપદ્માવતીપરિણયતારાવલિઃ

## Document Information

Text title : shrIpadmAvatIpariNayatArAvalI

File name : padmAvatIpariNayatArAvalI.itx

Category : devii, stotra, devI

Location : doc_devii

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha KavyakalApa

Latest update : June 10, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીપદ્માવતીપરિણયતારાવલિઃ

શ્રીમાનમ્ભોધિકન્યાવિહરણભવનીભૂતવક્ષઃપ્રદેશો
ભાસ્વદ્ભોગીન્દ્રભૂમીધરવરશિખરપ્રાન્તકેલીરસજ્ઞઃ ।
શશ્વદ્બ્રહ્મેન્દ્રવહ્નિપ્રમુખસુરવરારાધ્યમાનાઙ્ઘ્રિપદ્મઃ
પાયાન્નઃ શ્રીનિવાસઃ પ્રણતજનમનઃકામનાકલ્પશાખી ॥ ૧॥

શ્રીમચ્ચન્દ્રાન્વવાયે ત્રિજગતિ મહિતે ભૂપતિઃ કશ્ચનાસીત્
આકાશાખ્યઃ સ્વતેજઃપ્રશમિતસકલારાતિગર્વાન્ધકારઃ ।
પ્રાગાદ્યાશાવધૂટીકુચકલશતટીક્ષૌમિતાત્મીયકીર્તિઃ
નિર્વેલૌદાર્યશાલી હરિરિવ ધરણીં હ્લાદયન્નાદરેણ ॥ ૨॥

પુત્રાભાવાત્કદાચિન્નૃપકુલતિલકઃ પુત્રકામેષ્ટિહેતોઃ
ક્ષોણીં સીરેણ કર્ષન્ સ્ફુરદમલદલં હૈમમમ્ભોજમસ્યામ્ ।
દૃષ્ટ્વા તસ્મિંશ્ચ કન્ય઼ાં સરસિજનયનાં પુત્રિકેયમ્ । ત્વદીયે-
ત્યાકર્ણ્યાકાશવાણીમનવધિકુતુકસ્મેરવક્ત્રોઽગ્રહીત્તામ્ ॥ ૩॥

તસ્મિન્ યજ્ઞં નૃપેન્દ્રે કૃતવતિ મહિષી ભૂરિવાન્તર્નિધાનં
દિવ્યં તેજો વહન્તી સ્ફુટતમવિભવા લબ્ધસંસ્કારસમ્પત ।
અર્થં શક્તિત્રયીવાક્ષયમભિસુષુવે શક્રસાધ્વીસદૃક્ષા
પ્રાપ્તે કાલે મુહૂર્તે લસિતશુભગુણા મિત્રતુલ્યં સુપુત્રમ્ ॥ ૪॥

ધાત્રી પ્રોક્તઃ સ નિઘ્નો ગુરુષુ વિધિવદાકલ્પ્ય તજ્જાતકર્મ
સ્વારસ્યન્ત્મીયં ચાપ્યપત્યં વસુદમવનિજાં પદ્મતૌલ્યેન પદ્મામ્ ।
ચક્રે બાલશ્ચ સોઽયં વિધુરિવ વવૃધે વાસરૈશ્શુક્લપક્ષે
પિત્રાદેર્બ્રહ્મચર્યવ્રતમથ વિધિના પ્રાપ ચાસ્ત્રાણિ વેદાન્ ॥ ૫॥

બાલા રાજન્યમૌલેરનુદિનમતુલાં વૃદ્ધિમાસાદ્યમાના
સેયં લબ્ધોદયા શ્રીહિમકરકલિકેવાવલેહ્યાઙ્ગશોભા ।
કર્ણાન્તશ્રાન્તાપઙ્કેરુહદલનયના મન્દહાસોજ્જ્વલાસ્યા
સુભ્રૂસ્સૌન્દર્યલક્ષ્મીરિવ સકલજનાહ્લાદભૂત્યૈ બભૂવ ॥ ૬॥

તતઃ કદાચિત્–
તાં પદ્માં સ્વાલિવૃન્દૈસ્સહ કુસુમવને પારિજાતપ્રસૂના-
ન્યાદાયાદાય રમ્યે ક્વચિદનુલવલીમણ્ટપે નિક્ષિપન્તીમ્ ।
દૃષ્ટ્વા કોઽપ્યુત્તમસ્ત્વાં વિવહતિ પુરુષશ્શ્રીસમૃદ્ધોઽચિરેણે-
ત્યુક્ત્વા દત્ત્વા શુભાશીવચનમથ યયૌ નારદઃ પારદશ્રીઃ ॥ ૭॥

પશ્ચાદાખેટલોભાદધિ ગહનતલં ધાવયન્તં કરીન્દ્ર
દૃષ્ટ્વા તુઙ્ગે તુરઙ્ગે કમપિ ચ પુરુષં પદ્મપત્રાયતાક્ષમ્ ।
કોઽયં શ્રીમાન્ વનાન્તે વિચરતિ સખિ કિં દૃષ્ટપૂર્વસ્ત્વયાઽયં
નો ચેત્ પૃષ્ટ્વા સ્વરૂપં સ્મરરુચિરતનોશ્ચિત્તમાશ્વાસયામિ ॥ ૮॥

ઇતિ સખીમુક્ત્વા તં પ્રતિ–
કસ્ત્વં ભોઃશ્રીનિવાસોઽસ્મ્યહમખિલજગન્નાયકઃ કાઽસિ બાલે
શ્રીમાનાકાશનામા નૃપકુલતિલકસ્તસ્ય પદ્માઽસ્મિ પુત્રી ।
કસ્માદત્રાગતસ્ત્વં તરુણિ મનસિજં પૃછ જાને ન ચાહં
વામો વામોરુ યો મામનયદયિ તવ શ્રીપદામ્ભોજમૂલમ્ ॥ ૯॥

ઇતિ તેન પ્રત્યુક્ત્વા-
સેયં શ્યામા લતાઙ્ગી સરસિજનયનસ્યાન્તરઙ્ગં વિદિત્વા
રેરે મા માનિષાદ શ઼ૃણુ મમ વચનં યાહિ શીઘ્રં પિતા મે ।
આગન્તા કિં વિવિક્તે વસસિ ચિરમિતિ શ્લિષ્ટમુચ્ચાર્ય પાર્શ્વે
જ્ઞાત્વા ગૂઢાં સખીનાં સ્થિતિમથ નિરગાલ્લજ્જિતા તાઃ પ્રપેદે ॥ ૧૦॥

યાતે રાજીવનેત્રે સ્વયમથ સકલાસ્સ્વાસ્સખીસ્તા વિહાય
સ્વીયં પ્રાપ્યાવરોધં હૃદિ તમનુપદં ચિન્તયન્ત્યેકરૂપમ્ ।
દીના કન્દર્પતીવ્રપ્રહરણવિકલસ્વાન્તરઙ્ગા કૃશાઙ્ગી
નો નક્તં નો દિવા વા સ્વપિતિ વિહરતિ સ્નાતિ ભુઙ્ક્તે સ્મ પદ્મા ॥ ૧૧॥

ચેતસ્તસ્યા વિદિત્વા સ ચ હયમધિરુહ્યાશુ ગેહં પ્રપન્નઃ
કૃચ્છ્રેણાતીત્ય કક્ષ્યાઃ કથમપિ શયનાગારમભ્યેત્ય તલ્પે ।
તામેવાન્તર્દધાનો દિશિદિશિ પુરતઃ પાર્શ્વતશ્ચાપિ પદ્માં
પદ્માક્ષીમીક્ષમાણઃ પ્રતિકલમમુહ શ્ચિન્તયંસ્તદ્ગુણૌઘાન્ ॥ ૧૨॥

એહ્યેહ્યુત્તિષ્ઠ શેષે કિમિદમુપનતં નાસ્તિ તે કિં બુભુક્ષા
ભુઙ્ક્ષ્વ પ્રાતશ્ચ સમ્યઙ્ન હિ બત ભવતા ભુક્તમિત્યામનન્તી ।

આસીનાઽઽરાચ્ય કિં તે હૃદયગતમહો કિં નુ વા સુન્દરીં તે
દૃષ્ટ્વા મુગ્ધં મનસ્તે કુત ઇતિ વકુલા મેઽભિધત્સ્વેત્યપૃચ્છત્ ॥ ૧૩॥

માતઃ કાન્તારદેશે દ્વિરદમનુસરન્નેકતો દૈવયોગાત્
આત્મીયાભિસ્સખીભિસ્સહ કુસુમવને પારિજાતાપચાયમ્ ।
કુર્વન્તીં વ્યોમનામ્નો નૃપકુલતિલકસ્યાત્મજામમ્બુજાક્ષીમ્
અદ્રાક્ષં તત્કટાક્ષૈરપહૃતમભવન્મન્મનશ્ચેત્યવાદીત્ ॥ ૧૪॥

તતઃ
નેતું સમ્ભોજ્ય તં દ્રાગથ કૃતશપથા પ્રસ્થિતા તન્નગર્યાઃ
મધ્યેમાર્ગં મહેશં કલશજમુનિના પૂજિતં સમ્પ્રણમ્ય ।
પ્રાપ્યાનુજ્ઞાં મહર્ષેર્મહિતગુણનિધેર્વ્યાસસૂનોશ્શુકસ્યા-
તીત્યારણ્યાનિ પદ્માલિભિરથ વકુલા સઙ્ગતાઽઽસીત્ ક્રમેણ ॥ ૧૫॥

દૃષ્ટ્વા પૃષ્ટ્વા ચ બાલાઃ કિમિહ વસથ કા યૂયમિત્યાદરોક્ત્યા
માતઃ પદ્માવયસ્યા વયમિતિ ચ તદીયોત્તરં સા નિશમ્ય ।
પૌનઃપુણ્યેન મધ્યે પથિ નૃપતનયાશીલમાકર્ણયન્તી
પ્રાયાત્તૂર્ણં પ્રમોદાદ્વિયદધિપપુરીં પ્રાંશુહર્મ્યાગ્રભાગામ્ ॥ ૧૬॥

તદૈવ
આયાન્તીં વીથિકાયામથ શતસુષિરેણાંશુકેનાઞ્ચિતાઙ્ગીં
ગુઞ્જાશઙ્ખાદિભૂષામધિહૃદયતલં સ્વાત્મજં ધારયન્તીમ્ ।
ભૂતં ભવ્યં ભવદ્ધઃ ફલમપિ કથયામીતિ તારં ભણન્તીમ્
આનાય્યોચે ભવિષ્યદ્વદ ફલમિતિ તાં રાજપત્ની પુલિન્દામ્ ॥ ૧૭॥

સૈવં પશ્ચાત્પુલિન્દાઽપ્યયિ તવ તનયોદ્યાનદેશે યુવાનં
દૃષ્ટ્વા કન્દર્પતુલ્યં સિતનલિનદૃશં તં વૃષસ્યન્ત્યભીક્ષ્ણમ્ ।
વિદ્ધા કન્દર્પબાણૈરભિલષિતમસાવાપ્નુયાદેવ બાલે-
ત્યુક્ત્વા રાજ્ઞીમયાસીત્પથિપથિ ચ પુનર્વ્યાહરન્તી યથોક્તમ્ ॥ ૧૮॥

તતઃ
પુત્રીમાસાદ્ય રાજ્ઞી તવ કિમભિમતં બ્રૂહિ મે નૈવગોપ્યં
કિં વા કાર્યં કરિષ્યે તદપિ ચ તનયે તન્મમાચક્ષ્વ સદ્યઃ ।
એવં સાન્ત્વં જનન્યા કથિતમનુગતા મ્લિષ્ટમાહ સ્મ પદ્મા
માતઃ શ્રીશાવલોકાદહમભજમિમાં તદ્વિયોગજ્વરાર્તિમ્ ॥ ૧૯॥

રાજ્ઞી પુત્ર્યા રહસ્યં કથમપિ કથિતં સત્રપં સાનુતાપં

શ્રુત્વા વૈ(ફ)લ્યભીતસ્ફુટિતનિજમનાઃ કૃચ્છ્રતઃ સ્થાસ્નુધૈર્યા ।
વાસુ ત્વં નો વિભીયાસ્તવ હૃદયગતં નૈવ દુઃસાધમેતત્
સાધ્નોમિ ત્વાં ચ સાધુ પ્રિયતમહૃદયાં મોદયામીત્યવાદીત્ ॥ ૨૦॥

દૃષ્ટ્વા પદ્માસખીભિઃ સમમથ વકુલાઽઽકાશભૂમીશપત્નીં
દેવિ પ્રખ્યાતકીર્તિર્વૃષગિરિનિલયઃ શ્રીનિવાસસ્તવૈવ ।
કન્યાં સપ્રેમમૈચ્છત્કલયતુ ભવતી પદ્મિનીદાનપૂર્વં
તત્કલ્યાણં સુખેનેત્યવદદથ નૃપશ્ચાભ્યનન્દત્તથેતિ ॥ ૨૧॥

શ્રીમાનાકારિતસ્તં સુરગુરુરચિરાદેત્ય ચાકાશરાજં
શ્રીમન્વૈશાખમાસે સિતદલનવમીસંયુતે શુક્રવારે ।
અસ્તિ હ્યદ્વાહલગ્નં પ્રતિહતકલુષં નિશ્ચિતં સુપ્રશસ્તં
તસ્મિન્ પદ્માવિવાહો ભવતુ નૃપવરેત્યેવમારાદવોચત્ ॥ ૨૨॥

સોઽયં રાજેન્દ્રમૌલિસ્તદનુ સ વકુલાં પ્રેષયન્ વ્યાસસૂનું
દૂતૈરાનાય્ય તસ્મૈ વિધિવદતિથિસત્કારમાધાય ધીમાન્ ।
પદ્મિન્યા ત્વાં વિધિત્સુર્ગૃહિણમધિપ ઇત્યુચ્યતાં ભવ્યવાર્તે-
ત્યાખ્યાયારાચ્છુકર્ષિં ફણિગિરિનિલયસ્યાન્તિકં પ્રાહિણોત્તમ્ ॥ ૨૩॥

સદ્યસ્ત્વષ્ટા તદાત્વે વિયદધિપવિભોરાજ્ઞયા રાજધાનીં
નવ્યપ્રાસાદહર્મ્યપ્રમુખનિરુપમપ્રાભવાઢ્યામકાર્ષીત્ ।
રમ્ભાસ્તમ્ભૈઃ પ્રફુલ્લપ્રસવફલયુતૈ રમ્યચૂતપ્રવાલૈઃ
ચિત્રૈસ્સંસ્થાનભેદૈસ્તદનુ પુરજનોઽભૂષયદ્રઙ્ગવલ્લ્યા ॥ ૨૪॥

શ્રીરપ્યાત્મપ્રિયં તં મણિગણનિચિતે વિષ્ટરે સન્નિવેશ્યા-
ભ્યજ્ય શ્રીગન્ધતૈલૈર્ગગનચરધુનીવારિભિસ્સ્નાપયિત્વા ।
ક્ષૌમં સન્ધાર્ય નૂત્નં મૃગમદતિલકં ભાલભાગે વિધાયા-
તાનીદ્ગન્ધાનુલેપાદ્યખિલવિધપરિષ્કારમામોદભૂમ્ના ॥ ૨૫॥

પશ્ચાદ્બ્રહ્મેન્દ્રવૈવસ્વતવરુણકુબેરાદિભિર્દેવવૃન્દૈઃ
તૈસ્તૈર્બ્રહ્મર્ષિવર્યૈઃ પ્રથિતનિજતપસ્સમ્પદુન્મેષવદ્ભિઃ ।
વાણીન્દ્રાણીભવાનીમુખવિબુધવધૂસઙ્ઘયૈરઞ્ચિતોઽસૌ
યુક્તો માઙ્ગલ્યવાદ્યૈર્વિયદધિપપુરીં પ્રાવિશચ્છ્રીનિવાસઃ ॥ ૨૬॥

પદ્માશ્રીશૌ તદાનીં કરિપતગપતિસ્કન્ધદેશે નિષણ્ણૌ
આદાયાકાશરાજો નિજકુલગુરુભિઃ પૌરવૃદ્ધૈરમાત્યૈઃ ।
સાધ્વીલોકૈર્મૃદઙ્ગાદ્યખિલશુભમહાતૂર્યઘોષૈશ્ચ સાર્ધં

તીર્ણગ્રામોત્સવૌ તાવનુપમકુતુકાદાનિનાય સ્વગેહમ્ ॥ ૨૭॥

શ્રીપદ્માશ્રીનિવાસૌ નિજગળલસિતાં શ્રીમતીં પુષ્પમાલામ્
અન્યોન્યં મન્દહાસસ્ફુટરુચિરમુખામ્ભોરુહૌ લીલયૈવ ।
હર્ષોત્કર્ષં તદાનીં પુરજનહૃદયેષ્વાવહન્તૌ ત્રિવારં
વૃદ્ધાચારાનુરોધાદ્વિનિમયમવનીશાઙ્ગણે તાવકાર્ષ્ટામ્ ॥ ૨૮॥

સ શ્રીમાન્ શ્રીનિવાસો વિયદધિપસુતાપાણિમાલમ્બ્ય પાણૌ
નિર્દિષ્ટે તેન રાજ્ઞા વિવિધમણિમયસ્તમ્ભદિવ્યાન્તરાલે ।
શ્રીમત્કલ્યાણગેહે મણિગણવિલસન્મણ્ટપે વેદિમધ્યે
ભાસ્વદ્ભાસ્વત્પ્રકાશં મણિમયમવિશત્ પ્રાંશુ કલ્યાણપીઠમ્ ॥ ૨૯॥

પાદૌ નિર્ણિજ્ય તીર્થૈરથ મનુજપતિશ્શ્રીશમારાધ્ય સમ્યક્
દત્ત્વાઽનલ્પં કિરીટપ્રમુખમણિમયાશેષભૂષાવિશેષાન્ ।
પુત્રીં પદ્માં સહેમાક્ષતકુસુમશુભદ્રવ્યપૂર્ણામ્બુધારા-
પૂર્વં પ્રાદાત્ પ્રમોદાત્કરકમલતલે સોઽપિ જગ્રાહ પદ્મામ્ ॥ ૩૦॥

સ્રષ્ટા શ્રીશેન પદ્માગલભુવિ વિધિવન્મન્ત્રપૂતં પ્રશસ્તે
લગ્ને માઙ્ગલ્યસૂત્રં સહ શુભનિનદૈર્ધારયિત્વા વિધિજ્ઞઃ ।
પદ્માહસ્તાબ્જદત્તૈર્હુતભુજમપિ તૈર્હાવયિત્વાઽથ લાજૈઃ
એતૌ જાયાપતી શ્રીદ્વિજવરવચસાઽતોષયત્સમ્પ્રણમ્રૌ ॥ ૩૧॥

શ્રીમાન્બ્રહ્મેશસઙ્ક્રન્દનવરુણકુબેરાદિમાન્ દેવસઙ્ઘાન્
દેવોઽનુજ્ઞાપ્ય સર્વાન્ શ્વશુરમપિ મુદાઽઽનમ્ય પાદારવિન્દે ।
શેષાદ્રૌ શ‍ૃઙ્ગભાગે રુચિરમણિમહાસૌધસઙ્ઘે નિતાન્તં
લક્ષ્મીપદ્માવતીભ્યામરમત મુદિતઃ પ્રેમસમ્પૂર્ણચેતાઃ ॥ ૩૨॥

શ્રીમાન્ શ્રીવત્સાઙ્કિતવક્ષા વક્ષોધિવાસિલક્ષ્મીકઃ ।
શ્રીવેઙ્કટેશદેવસ્સતતં શ્રેયાંસિ દિશતુ ભૂયાંસિ ॥ ૩૩॥

શ્રીશેષશર્માભિનવોપક્લૃપ્તઃ પ્રિયેણ ભક્ત્યા ચ સમર્પિતોઽયમ્ ।
પદ્માવિભોર્મઙ્ગલકણ્ઠદેશે વિરાજતાં શ્રીનવકણ્ઠતારઃ ॥ ૩૪॥

॥ ઇતિ શ્રીપદ્માવતીપરિણયતારાવલિઃ સમાપ્તા ॥

From venkaTeshakAvyakalApaH

Proofread by Malleswara Rao Yellapragada malleswararaoy at yahoo.com

*shrIpadmAvatIpariNayatArAvaliH*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*